वर्णान् हृत्वा तु पुरुषो मृतो जायेत वर्हिणः । हृत्वा रक्तानि वस्त्राणि जायते जीवजीवकः । वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानवः । कुच्छुन्दरित्वमाप्नोति राजन् ! लोभपरायणः । तत्र जीवति वर्षाणि ततो दश च पञ्च च । अधर्म्मस्य क्षयं कृत्वा ततो जायेत मानवः । चोरयित्वा पयश्चापि बलाका सम्प्रजायते । यस्तु चोरयते तैलं नरो मोहसमन्वितः । सोऽपि राजन् ! मृतो जन्तुस्तैलपायी प्रजायते । अशस्त्रं पुरुषं हत्वा सशस्त्रः पुरुषाधमः । अर्थार्थी यदि वा वैरी स मृतो जायते खरः । खरो जीवति वर्षे द्वे ततः शस्त्रेण बध्यते । स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायत । मृगो बध्यति शस्त्रेण गते संवत्सरे तु सः । हतो मृगस्ततो मीनः सोऽपि जालेन बध्यते । मासे चतुर्थे सम्प्राप्ते श्वापदः सम्प्रजायते । श्वापदो दश वर्षाणि द्वीपी वर्षाणि पञ्च च । ततस्तु निधनं प्राप्य कालपर्य्यायनोदितः । अधर्म्मस्य क्षयं कृत्वा ततो जायेत मानुषः । स्त्रियं हत्वा तु दुर्बुद्धिर्यमस्य विषयं गतः । बहुक्लेशान् समासाद्य संसारांश्चैव विंशतिम् । ततः पश्चान्महाराज ! कृमियोनौ प्रजायते । कृमिर्विंशतिवर्षाणि भूत्वा जायेत मानुषः । भोजनं चोरयित्वा तु मक्षिका जायते नरः । मक्षिकासङ्घवशगो बहून् मासान् भवत्युत । ततः पापक्षयं कृत्वा मानुषत्वमवाप्नुते । धान्यं हृत्वा तु पुरुषो लोमशः सम्प्रजायते । तथा पिण्याकसंमिश्रमशनं चोरयन्नरः । स जायते वस्तुसमो दारुणो मूषिको महान् । दशन् वै मानुषं नित्यं पापात्मा स प्रजायते । घृतं हृत्वा तु दुर्बुद्धिः काकमद्गुः प्रजायते । मत्स्यमांसमथो हृत्वा काको जायेत दुर्म्मतिः । लवणं चोरयित्वा तु चौरिकाकः प्रजायते । विश्वासेन तु निक्षिप्तं यो वै निह्नौति मानवः । स गतायुर्नरस्तादृक् मत्स्ययोनौ प्रजायते । मत्स्ययोनिमनुप्राप्य मृतो जायेत मानवः । मानुषत्वमनुप्राप्य क्षीणायुरुपपद्यते । पापानि तु नरः कृत्वा तिर्य्यग् जायेत भारत ! । न चात्मनः प्रमाणन्ते धर्म्मं जानन्ति किञ्चन । ये पापानि नराः कृत्वा निरस्यन्ति व्रतैः सदा । सुखदुःखसमायुक्ता व्याधितास्ते भवन्त्युत । असंवासाः प्रजायन्ते म्लेच्छा अपि न संशयः । नराः पापसमाचारा लोभमोहसमन्विताः । वर्ज्जयन्ति च पापानि जन्मप्रभृति ये नराः । अरोगा रूपवन्तश्च धनिनश्च भवन्त्युत । स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयुः । एतेषामेव जन्तूनां भार्य्यात्वमुपयान्ति ताः । परस्वहरणे दोषाः सर्व्व एव प्रकीर्त्तिताः । एतद्वै लेशमात्रेण कथितं ते मयाऽनघ ! । अपरान् मत्कथायोगे भूयः श्रोष्यसि भारत ! । एतन्मया महाराज ! ब्रह्मणो वदतः पुरा । सुरर्षीणां श्रुतं मध्ये पृष्टश्चापि यथातथम् । मयाऽपि तच्च कार्त्स्न्येन यथावदनुवर्णितम् । एतच्छ्रुत्वा महाराज ! धर्मे कुरु मनः सदा इ० वं० । "महापातकजान् घोरान्नरकान् प्राप्य दारुणान् । कर्म्मक्षयात् प्रजायन्ते महापातकिनस्त्विह । मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति । खरपुक्कसवेणानां सुरापो नात्र संशयः । कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात् । तृणगुल्मलतात्वञ्च क्रमशो गुरुतल्पग" इति । "श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम् । चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति । कृमिकीटपतङ्गानां विड्भुजाञ्चैव पक्षिणाम् । हिंस्राणाञ्चैव सत्वानां सुरापो ब्राह्मणो व्रजेत् । लूताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम् । हिंस्राणाञ्च पिशाचानां स्तेनो विप्रः सहस्रशः । तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि । क्रूरकर्म्मकृताञ्चैव शतशो गुरुतल्पग" इति । "ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः । हेमहारी च कुनखी दुश्चर्म्मा गुरुतल्पगः । यो येन संवसत्येषां स तल्लिङ्गोऽभिजायते । अन्नहर्त्तामयावी स्यान्मूकोवागपहारकः । धान्यमिश्रोऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः । तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचकः । यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः । अवश्यं याति तिर्य्यक्त्वञ्जग्ध्वा चैवाहुतं हविरिति" । "परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च । अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः । हीनजातौ प्रजायेत पररत्नापहारकः । पत्रशाकं शिखी हृत्वा, गन्धान् कुच्छुन्दरिः शुभान् । मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः । विविधानि च रत्नानि जायते हेमकर्त्तृष्विति" । "मूषिको धान्यहारी, स्याद्यानमुष्ट्रः, कपिः फलम् । जलं प्लवः, पयः काको, गृहकारी ह्युपस्करम् । मधु दंशः, पलं गृध्रो, गां गोधा,ऽग्निं बकस्तथा । श्वित्री वस्त्रं, श्वा रसन्तु, चीरी लवणहारकः । प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्म्मणि । द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः" इति । "द्रव्यस्यापह्रियमाणस्य यादृशाः प्रकारास्तादृशा एव प्राणिजातयः स्तेयकर्म्मण्यपहर्त्तारो भवन्ति यथा कांस्यहारी हंस इति । अथवा यत्फलसाधनन्द्रव्यमपहरति तत्साधनविकलो यथा पङ्गुतामश्वहारक इति" मिता० । "ब्रह्महा